# shrI Subrahmanya Mangala Ashtakam

# શ્રીસુબ્રહ્મણ્યમઙ્ગળાષ્ટકમ્

## Document Information

Text title : shrii subrahmaNyamaNgaLaaShTakaM

File name : subramangala8.itx

Category : aShTaka, subrahmanya, mangala

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : September 29, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# shrI Subrahmanya Mangala Ashtakam

# શ્રીસુબ્રહ્મણ્યમઙ્ગળાષ્ટકમ્

શિવયોસૂનુજાયાસ્તુ શ્રિતમન્દાર શાખિને ।
શિખિવર્યાતુરંગાય સુબ્રહ્મણ્યાય મઙ્ગળમ્ ॥

ભક્તાભીષ્ટપ્રદાયાસ્તુ ભવમોગ વિનાશિને ।
રાજરાજાદિવન્દ્યાય રણધીરાય મઙ્ગળમ્ ॥

શૂરપદ્માદિ દૈતેય તમિસ્રકુલભાનવે ।
તારકાસુરકાલાય બાલકાયાસ્તુ મઙ્ગળમ્ ॥

વલ્લીવદનરાજીવ મધુપાય મહાત્મને ।
ઉલ્લસન્મણિ કોટીર ભાસુરાયાસ્તુ મઙ્ગળમ્ ॥

કન્દર્પકોટિલાવણ્યનિધયે કામદાયિને ।
કુલિશાયુધહસ્તાય કુમારાયાસ્તુ મઙ્ગળમ્ ॥

મુક્તાહારલસત્ કુણ્ડ રાજયે મુક્તિદાયિને ।
દેવસેનાસમેતાય દૈવતાયાસ્તુ મઙ્ગળમ્ ॥

કનકાંબરસંશોભિ કટયે કલિહારિણે ।
કમલાપતિ વન્દ્યાય કાર્તિકેયાય મઙ્ગળમ્ ॥

શરકાનનજાતાય શૂરાય શુભદાયિને ।
શીતભાનુસમાસ્યાય શરણ્યાયાસ્તુ મઙ્ગળમ્ ॥

મંગળાષ્ટકમેતન્યે મહાસેનસ્યમાનવાઃ ।
પઠન્તી પ્રત્યહં ભક્ત્યાપ્રાપ્નુયુસ્તેપરાં શ્રિયમ્ ॥

॥ ઇતિ સુબ્રહ્મણ્ય મઙ્ગળાષ્ટકં સમ્પૂર્ણમ્ ॥

॥ ઇતર મઙ્ગળ શ્લોકાનિ ॥

નિત્યોત્સવો ભવત્યેષાં નિત્યશ્રીર્નિત્ય મઙ્ગળમ્ ।
યેષાં હૃદિસ્થો ભગવાન્ મઙ્ગળાયતનં ગુહઃ ॥

રાજાધિરાજવેષાય રાજત્ કોમળપાણયે ।
રાજીવચારુનેત્રાય સુબ્રહ્મણ્યાય મઙ્ગળમ્ ॥

॥ ઇતિઃ ॥

Encoded and proofread by
Antaratma antaratma at Safe-mail.net

*shrI Subrahmanya Mangala Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*